Topic 22

Date
Page

## समानाधिकरण कर्मधारय समास-5

कडाराः कर्मधारये कडारादयः शब्दाः कर्मधारये वा पूर्वं प्रयोज्याः । कडारजैमिनिः । जैमिनिकडारः ।

कुमारः श्रमणादिभिः । कुमारी श्रमणा कुमारश्रमणा । इह गणे श्रमणा प्रव्रजिता गर्भिणीत्यादयः स्त्रीलिङ्गाः पठ्यन्ते । लिङ्गविशिष्टपरिभाषया एतदेव ज्ञापकं बोध्यम् ।

चतुष्पादो गर्भिण्या । चतुष्पाज्जातिवाचिनो गर्भिणीशब्देन सह प्राग्वत् । गोगर्भिणी । 'चतुष्पाज्जातिरिति वक्तव्यम्' नेह । स्वस्तिमती गर्भिणी । मयूरव्यंसकादयश्च एते निपात्यन्ते । मयूरो व्यंसकः मयूरव्यंसकः । व्यंसको धूर्तः । उदक्चावाक्चोच्चावचम् । निश्चितं च प्रचितं च निश्चप्रचम् । नास्ति किञ्चन यस्य सोऽकिञ्चनः । नास्ति कुतो भयं यस्य सोऽकुतोभयः । अन्यो राजा राजान्तरम् । चिदेव चिन्मात्रम् । आख्यातमाख्यातेन क्रियासातत्ये । अश्नीत पिबतेत्येवं सततं यत्राभिधीयते सा अश्नीतपिबता । पचतभृज्जता खादतमोदता । 'एहीडादयोऽन्यपदार्थे' एहीड इति यस्मिन् कर्मणि तदेहीडम् । एहियवम् । उद्धर कोत्सृज इतीति यस्यां क्रियायां सोद्धरोत्सृजा । उद्धमविधमा ।

असमर्थ्ये असातत्यार्थे पाठः। जाहि कर्मणा
बहुलमाभीक्ष्ण्ये कर्तारं चाभिदधाति॥
जाहीत्येतत् कर्मणा बहुलं समस्यते आभी-
क्ष्ण्ये गम्ये समासेन चेत् कर्ताभिधीयते
इत्यर्थः। जाहि जोडः। जाहिस्तम्बः।
ईषदकृता। ईषत्पिङ्गलः 'ईषद् गुण-
वचनेनेति वाच्यम्'। ईषदकृतम्